III

Total No. of Questions - 16
Total No. of Printed Pages - 4

Regd. No.

## Part - II

## SANSKRIT, Paper - II

## (Second Language)

*Time : 3 Hours* *Max. Marks : 100*

*Note :*

1. ***All** questions should be attempted.*
2. *Question Nos. 1, 2 and 3 should be answered either in the medium of instructions of the candidate or in Sanskrit (Devnagari Script).*
3. *The remaining questions should be answered in Sanskrit (Devnagari Script) only.*

**सूचना** : प्रथम, द्वितीय, तृतीय प्रश्नान् विहाय अन्ये सर्वेऽपि प्रश्नाः संस्कृतभाषायामेव समाधातव्याः ।

**I.** **एकस्य** श्लोकस्य प्रतिपदार्थं भावं च लिखत । $1 \times 8 = 8$

अ) दानं धर्मश्च विद्या च रुपं शीलं कुलं तथा ।
सुखमायुर्यशश्चैव नव गोप्यानि यत्नतः ।।

आ) गुणस्तवेन कुर्वन्ति महतां मानवर्धनम् ।
हनूमानभवत् स्तुत्या रामकार्यभरक्षमः ।।

**II.** **एकं** निबन्धप्रश्नं समाधत्त । $1 \times 6 = 6$

अ) हरिश्चन्द्रः सत्यमेव जयते इति कथं निरुपितवान्?

आ) 'काव्यं पुष्पविलापनाम हृदि मे स्फूर्तम्' - विवृणुत ।

**III.** **एकं** निबन्धप्रश्नं समाधत्त । $1 \times 6 = 6$

अ) गोपालः कृष्णः कथं गोविन्दः अजायत?

आ) दधीचेः दानगुणमधिकृत्य लिखत ।

IV. **त्रयाणां** प्रश्नानां समाधानं लिखत । 3 × 2 = 6

अ) पार्वती तपः कथम् आचरति?

आ) वासुकिना गरुत्मान् किमिति अभिहितः ?

इ) आत्मनः वनगमनविषये रामः भरतं किमवदत्?

ई) किमर्थं गरुडेन देवलोकात् अमृतवृष्टिः पतिता?

उ) ऐरावताधिरूढः देवेन्द्रः किमर्थं प्रतीक्षते?

ऊ) राज्यं नाम कीदृशम्?

V. **द्वयोः** ससन्दर्भं व्याख्यानं लिखत । 2 × 3 = 6

अ) भविता ते न कदापि सत्त्वसादः ।

आ) अवदत् माङ्गलिकं गलेऽस्ति ते ।

इ) ननु भोः मातुः, शिशुं मा भिदः ।

ई) विशाम्यहं हि पातालं तरसा गृह्य शङ्करम् ।

VI. **द्वयोः** ससन्दर्भं व्याख्यानं लिखत । 2 × 3 = 6

अ) मन्ये इदं मम परमं सौभाग्यम् ।

आ) यदि कौतूहलम् आकर्ण्यताम् ।

इ) मनः एव मनुष्याणां कारणं बन्धमोक्षयोः ।

ई) किमस्माकम् अमुना अभिवर्षेण ।

VII. **त्रयाणां** प्रश्नानां समाधानं लिखत । 3 × 2 = 6

अ) कस्मात् युधिष्ठिरः नरकक्लेशं ददर्श?

आ) केन सर्वरोगस्य सम्भवः भवति?

इ) अयं पुष्पविलापः कस्य कवेः ग्रन्थस्य अनुवादः भवति ?

ई) चन्द्रमत्याः हरिश्चन्द्रस्य स्मृतिः कस्मात् आगता?

उ) अगस्त्यः कम्परायाय किमर्थं खड्गं प्रेषयति?

ऊ) कानि यत्नतः गोप्यानि?

VIII. **त्रयाणां** प्रश्नानां समाधानं लिखत । 3 × 2 = 6

अ) बाणभट्टेन विरचितं काव्यद्वयं किम्?

आ) अन्ते वीरः राजानं किमवोचत्?

इ) श्रीरामकृष्णः कम् आश्रित्य वसति स्म?

ई) विष्णोः वचनं श्रुत्वा इन्द्रः किमवदत्?

उ) अगस्त्यमुनेः आश्रमः कस्य तीरे आसीत्?

ऊ) शिखिध्वजः कीदृशः? सः राज्ये किमकरोत्?

IX. **एकेन** वाक्येन समाधानं दत्त । 5 × 1 = 5

अ) हरिश्चन्द्रस्य केन विस्मृतिः आगताः?

आ) सर्वलोकपितामहः कः?

इ) शिशुपालस्य शिरः केन छिन्नम्?

ई) मधुराविजयस्य कर्त्री का?

उ) सर्वरोगक्षयः केन भवति?

X. **एकेन** वाक्येन समाधानं दत्त । 5 × 1 = 5

अ) गोविन्दपट्टाभिषेकः कस्मात् ग्रन्थात् स्वीकृतः?

आ) शुकस्य नाम किम्?

इ) वृत्रासुरः कस्य भक्तः?

ई) शिखिध्वजस्य भार्या का?

उ) परनारीसहोदरः कः?

XI. अधोनिर्दिष्ट कथां पठित्वा प्रश्नाना समाधानानि दत्त ।

उज्जयिन्यां भट्टिः नाम कोऽपि ब्राह्मणः आसीत् । तस्य अभयाम्बा नाम भार्या, कमलाकरो नाम तनयः च आस्ताम् । एकपुत्रौ तौ दम्पती कमलाकरे नितान्तं प्रेमवन्तौ बभूवतुः । सः तु शरीरम् अलङ्कृत्य विद्यापराङ्मुखः विषयोन्मुखः च अभवत् । तथाविधिं तम् आहूय भट्टिः कदाचिदेवम् उपदिदेश ।

मानवकुले जन्म महता पुण्येन लभ्यते । तत् लब्ध्वा अपि त्वमेवं दुर्वृत्तः असि । किञ्च तवायं विद्याभ्यासस्य कालः । इदानीं यदि विद्यां नाभ्यस्यसि तर्हि पश्चात्तव महासन्तापः भविष्यति । अपरं च यावत् अहं जीवामि तावत्त्वया विद्या अभ्यासनीया । पश्चातु सा दुर्लभा भवेत् ।

**प्रश्ना :** 5 × 1 = 5

1. उज्जयिन्यां कः आसीत्?
2. भट्टिः भार्यायाः नाम किम्?
3. भट्टेः तनयस्य नाम किम्?
4. का पश्चात् दुर्लभा भवति?
5. किं महता पुण्येन लभ्यते ?

**XII.** नामनिर्देशपूर्वकं **त्रीणि** सन्धत । 3 × 2 = 6

अ) शरत् + चन्द्रः आ) तपः + वनम् इ) सुप् + अन्तम्

ई) तत् + नाम उ) गुरुः + जयति ऊ) तत् + टीका

**XIII.** नामनिर्देशपूर्वकं **त्रीणि** विघटयत । 3 × 2 = 6

अ) वाग्वादः आ) हरिष्टीकते इ) नमस्ते

ई) मनश्चलति उ) षण्मुखाः ऊ) वृक्षःफलति

**XIV.** **द्वयोः** शब्दयोः सविभक्तिं रुपाणि लिखत । 2 × 6 = 12

अ) मनस् आ) वाक्

इ) एतत् (पुं) ई) राजन्

**XV.** समासनामनिर्देशपूर्वकं **त्रयाणां** विग्रहवाक्यानि लिखत । 3 × 2 = 6

अ) कार्यकुशलः आ) भोज्योष्णम्

इ) चोरभयम् ई) महाबलः

उ) सप्तरात्रम् ऊ) अधर्मः

**XVI.** अधोरेखाङ्कित पदं शुद्धीकृत्य वाक्यं लिखत । 5 × 1 = 5

अ) छात्रः गुरुं नमस्कुर्वन्ति ।

आ) बालः गृहाणि अगच्छन् ।

इ) तौ चित्रं पश्यन्ति ।

ई) युवां जलं पास्यथ ।

उ) एषा पत्रम् अलिखन् ।